इति भाषा। तत्पर्य्यायः। पूतिकः २ मार्ज्जातकः ३ सुगन्धी ४ मूत्रपातनः ५ गन्धमार्ज्जारकः ६। इति राजनिर्घण्टः॥ अस्य सुश्रुगुणाः।
"गन्धमार्ज्जारवीर्य्यन्तु वीर्य्यकृत् कफवातहृत्।
कण्डूकोठहरं नेत्र्यं सुगन्धं स्वेदगन्धनुत्॥"
इति भावप्रकाशः॥

लोमशा, स्त्री, (लोमानि सन्त्यस्या इति। लोमन्+श। टाप्।) काकजङ्घा। मांसी। (अस्याः पर्य्यायो यथा,—
"नलदं नन्दिनी पेषी मांसी लघ्वलटा जटी।
किरातिनी च जटिला लोमशा तु तपस्विनी॥"
इति वैद्यकरत्नमालायाम्॥)
वचा। (अस्याः पर्य्यायो यथा,—
"वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्व्विका।
क्षुद्रपत्री च मङ्गल्या जटिलोग्रा च लोमशा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
शूकशिम्बिः। महामेदा। काशीशम्। शाकिनीभेदः। इति मेदिनी। शे, २०॥ अतिबला। इति विश्वः॥ शतपुष्पी। एर्व्वारुः। गन्धमांसी। इति राजनिर्घण्टः॥

लोमशातनं, क्ली, (लोम्नां शातनम्।) लोमयातनम्। तस्यौषधानि यथा,—
"हरितालं शङ्खचूर्णं कदलीदलभस्मना।
एतद्द्रव्येण चोद्वर्त्तो लोमशातनमुत्तमम्॥
लवणं हरितालञ्च तण्डुलाश्च फलानि च।
लाचारसमसमायुक्तं लोमशातनमुत्तमम्॥
सुधा च हरितालञ्च शङ्खश्चैव मनःशिला।
सैन्धवेन सहैकत्र छागमूत्रेण पेषयेत्।
तत्प्रलेपोद्वर्त्तनादेव लोमशातनमुत्तमम्॥"
इति गारुडे १८५ अध्यायः॥
(तथाच।
"भल्लातकं विडङ्गञ्च यवचारञ्च सैन्धवम्।
मनःशिला शङ्खचूर्णं तैलपक्वं तथैव च।
लोमानि शातयत्येव नात्र कार्य्या विचारणा॥"
इति वैद्यके भैषज्यधन्वन्तरौ वशीकरणाद्यधिकारे॥ * ॥)

लोमहर्षणं, क्ली, (लोम्नां हर्षणमिव।) रोमाञ्चः। इत्यमरः॥ (लोम्नां हर्षणमस्मादिति। रोमाञ्चकारके, त्रि। यथा, महाभारते।६।६७।२३।
"तस्मिन् महाभये घोरे तुमुले लोमहर्षणे।
ववर्षुः शरजालानि चत्रिया युद्धदुर्म्मदाः॥")

लोमहर्षणः, पुं, (विचित्रपुराणकथाश्रवणात् लोम्नां हर्षणं उद्गमो यस्मात्।) सूतः। यथा,
"पुराणसंहितां चक्रे पुराणार्थविशारदः।
प्रख्यातो व्यासशिष्योऽभूत् सूतो वै लोमहर्षणः।
पुराणसंहितां तस्मै ददौ व्यासो महामुनिः॥"
इति विष्णुपुराणे ३ अंशे ७ अध्यायः॥ * ॥
स च बलरामेण हतः। यथा,—
"तथा चैवं सूतपुत्त्रो निहतो लोमहर्षणः।
बलरामास्त्रयुक्तात्मा नैमिषेऽभूत् स्वाज्ञया॥"
इति कल्किपुराणे २७ अध्यायः॥

लोमहृत्, पुं, (लोमानि हरति नाशयतीति। हृ+क्विप्।) हरितालम्। इति हेमचन्द्रः॥

लोमालिका, स्त्री, (लोमाल्या लोमश्रेण्या कायतीति। कै+कः। टाप्।) शृगालिका। यथा,—
"लोमालिका दीप्तजिह्वा किङ्खिरुल्कामुखी च सा॥"
इति त्रिकाण्डशेषः॥

लोलः, त्रि, (लोड़तीति। लुड़ विलोड़ने+अच्।) चपलः। (यथा, साहित्यदर्पणे ३ परिच्छेदे। १४९।
"पल्लवोपमितिसाम्यसपर्च्चं
दष्टवत्यधरबिम्बमभीष्टे।
पर्य्यकूजि सरुजेव तरुण्या-
स्तारलोलवलयेन करेण॥")
साकाङ्क्षः। इत्यमरः॥ (यथा, रघुः।७।२३।
"ह्रीयन्त्रणामानशिरे मनोज्ञा-
मन्योन्यलोलानि विलोचनानि॥"
पुं, तामसमनुः। इति मार्कण्डेयपुराणम्। ७४। ४१॥)

लोला, स्त्री, (लोल+टाप्।) जिह्वा। लक्ष्मीः। इति मेदिनी। ले, ४७॥ चपला स्त्री च। (यथा, आर्य्यासप्तशत्याम्। ६०८।
"सर्व्वाङ्गमर्पयन्ती लोला सुखं भ्रमेण शय्यायाम्।
अलसमपि भाग्यवन्तं भजते पुरुषायितेव श्रीः॥"
चतुर्द्दशाचरवृत्तिविशेषः। इति छन्दोमञ्जरी॥ अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्॥)

लोलार्कः, पुं, (लोलनामा अर्कः।) सूर्य्यः। यथा,
पुलस्त्य उवाच।
"ततः सुकेशिवचनात् सर्व्व एव निशाचराः।
तेनोदितन्तु ते धर्म्मं चक्रुर्मुदितमानसाः॥
ततः प्रवृद्धिं सुतरामगच्छन्त निशाचराः।
पुत्त्रपौत्त्रार्थसंयुक्ताः सदाचारसमन्विताः॥
तज्ज्योतिस्तेजसा तेषां राक्षसानां महात्मनाम्।
गन्तुं नाशक्नुवन् सूर्य्यो नक्षत्राणि च चन्द्रमाः॥
ततस्त्रिभुवनं ब्रह्मन् निशाचरपुरोऽभवत्।
दिवा सूर्य्यस्य सदृशः चणदायाञ्च चन्द्रवत्॥
ततः क्रोधाभिभूतेन भानुना तिग्मदीधितिः।
भानुभी राक्षसपुरं तद्दृष्टञ्च यथेच्छया॥
सद्भानुना तदा दृष्टं क्रोधाध्मातेन चक्षुषा।
निपपाताम्बराद्दृष्टः चीणपुण्य इव ग्रहः॥
पतमानं समालोक्य पुरं शालङ्कटङ्कटः।
नमो भवाय सर्व्वाय इदमुच्चैरधीयत॥
तेषां क्रन्दितमाकर्ण्य चारणा गगनेचराः।
हाहेतुश्चक्रुशुः सर्व्वे हरभक्तः पतत्यसौ॥
तच्चाराद्वचः शर्व्वः श्रुतवान् सर्व्वतोऽव्ययः।
श्रुत्वा स चिन्तयामास केनासौ पात्यते भुवि॥
ज्ञातवान् देवपतिना सहस्रकिरणेन तत्।
पातितं राक्षसपुरं ततः क्रुद्धस्त्रिलोचनः॥
क्रुद्धस्तु भगवान् दृग्भिर्भास्करमन्तमपश्यत।
दृष्टमात्रस्त्रिनेत्रेण निपपात ततोऽम्बरात्॥
ततो ब्रह्मा सुरपतिः सुरैः सार्द्धं समभ्ययात्।
रम्यं महेश्वरस्थानं मन्दरं रविकारणात्॥
गत्वा दृष्ट्वा च देवेशं शङ्करं शूलपाणिनम्।
प्रसाद्य भास्करार्थाय वाराणस्यामुपानयत्॥
ततो दिवाकरं भूयः पाणिनादाय शङ्करः।
कृत्वा नामास्य लोलेति रथमारोपयत् पुनः॥
आरोपिते दिनकरे ब्रह्माभ्येत्य सुकेशिनम्।
सबान्धवं सनगरं पुनरारोपयद्दिवि॥"
इति श्रीवामनपुराणे सुकेशिचरिते लोलार्कजननं नाम १५ अध्यायः॥

लोलिका, स्त्री, (लोलतीति। लुल+ण्वुल्। टापि अत इत्वम्।) चाङ्गेरी। यथा,—
"क्षुद्रा दन्तशठाम्लष्ठा चाङ्गेरी लोलिका च सा॥"
इति जटाधरः॥

लोलितः, त्रि, श्रथः। ओला इति भाषा। लुल विमर्द्दे अस्माद्भावे घञि लोलः लोलोऽस्य जातः इत्यर्थे इतप्रत्ययेन निष्पन्नः॥

लोलुपः, त्रि, (गर्हितं लुम्पतीति। लुप+यङ्+अच्।) अतिलुब्धः। इत्यमरः॥ (यथा, माघे। १। ४०।
"तथापि वाचालतया युनक्ति मां
मिथस्त्वदाभाषणलोलुपं मनः॥")

लोलुभः, त्रि, (भृशं लुभ्यतीति। लुभ+यङ्+अच्।) लोलुपः। इत्यमरः॥ (यथा, कथासरित्सागरे। ११७। ४६।
"स्त्रियोऽपीच्छन्ति पुंभावं यं दृष्ट्वा रूपलोलुभाः।
तस्यास्ते को भवेन्नार्य्यो तुल्यरूपः स किं पुनः॥")

लोष्ट, ङ संहतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, लोष्टते धान्यं लोकः। इति दुर्गादासः॥

लोष्टं, क्ली, (लोष्टते इति। लोष्ट+अच्।) लौहमलम्। इति राजनिर्घण्टः॥ लेष्टुः। इत्यमरः॥

लोष्टः, पुं क्ली, (लोष्टते इति। लोष्ट+घञ्। यद्वा, लूयते इति। लू+"लोष्टपलितौ।" उणा० ३। ६२। इति तन्प्रत्ययेन निपातितः।) मृत्तिकाखण्डम्। ढेला इति भाषा। तत्पर्य्यायः। लोष्टुः २। इति शब्दरत्नावली अमरश्च। लोष्टुः ३ दलिः ४। इति हेमचन्द्रः॥ (यथा, वैतालपञ्चविंशत्याम्। १।
"अहौ वा हारे वा बलवति रिपौ वा
सुहृदि वा
मणौ वा लोष्टे वा कुसुमशयने वा दृषदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित्पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः॥")

लोष्टघ्नः, पुं, (लोष्टं हन्तीति। हन+टक्।) लेष्टुभेदनः। इत्यमरटीकायां भरतः॥

लोष्टभेदनः, पुं, (भिनत्तीति। भिद्+ल्युः। लोष्टस्य भेदनः।) लोष्टभञ्जनसाधनमुद्गरः। मर इति ख्याते इति केचित्। तत्पर्य्यायः। लेष्टुभेदनः २ लोष्टघ्नः ३ लेष्टुघ्नः ४ कोटिशः ५ कोटीशः ६। इत्यमरटीका॥

लोष्टुः, पुं, लोष्टः। इति हेमचन्द्रः॥